№ 000103

D-DTN-J-TLA

SANSKRIT

Paper I

(Literature)

Time Allowed : Three Hours

Maximum Marks : 300

INSTRUCTIONS

Candidates should attempt questions no. 1 and 5 which are compulsory, and any THREE of the remaining questions, selecting at least ONE question from each Section.

The number of marks carried by each question is indicated at the end of the question.

Questions no. 1, 5 and 8 must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.

Answers written in Sanskrit must be in Devanāgarī script.

SECTION A

1. (a) अधोलिखितानां संस्कृतेन समाधानं कार्यम् । 3

(i) अट् — प्रत्याहारे के वर्णाः ?

(ii) का संयोग-संज्ञा ?

(iii) शिष्याः शास्त्रं पठन्ति । — वाच्यपरिवर्तनं क्रियताम् ।

Optional Province · optionalprovince.com

(b) अधोलिखितानां पदानां सुरगिरा सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः कार्यः । *12*

मनस्यवधार्य, गङ्गोदकम्, सुमती रामः, तांश्च ।

(c) अधोदत्तेषु वाक्येषु रेखाङ्कितपदानां विभक्तिप्रयोगस्य याथार्थ्यं सूत्रोल्लेखपूर्वकं विचार्यम् । *25*

(i) अधीती व्याकरणे ।

(ii) आसनात् अधीयते विद्यार्थिनः ।

(iii) रोगी शय्याम् अधिशेते ।

(iv) तेभ्य एवं वक्तव्यम् ।

(v) प्रसादाय स्पृहयन्ति भक्ताः ।

(d) समासो विधीयताम्; समासनाम चोल्लेख्यम् । *20*

(i) अहश्च निशा च ।

(ii) कुण्डलाय हिरण्यम् ।

(iii) बलमनतिक्रम्य ।

(iv) श्रीचैतन्यश्च नित्यानन्दश्च ।

(v) सर्पेण दष्टः ।

2. भाषाविज्ञानदृष्ट्या वैदिकभाषाया वैशिष्ट्यानि विशद्यन्ताम् । *60*

3. वाक्यं रसात्मकं काव्यम् — विस्तरेण व्याख्येयमिदं लक्षणम् । *60*

4. रामायणकथामवलम्ब्य रचितानि पञ्च नाटकानि नामत उल्लिख्य तेषां काव्यमाहात्म्यं प्रतिपाद्यताम् । *60*

Optional Province · optionalprovince.com

SECTION B

5. Write an essay in Sanskrit as indicated in the instructions in Sanskrit below :

न्यूनतः सार्धशतत्रय-(350)-परिमितैः शब्दैः, सुरगिरा विरच्यतामेको निबन्धः, अधोदत्तेषु विषयेषु एकतमं गृहीत्वा, नागराक्षरैश्च । *60*

(a) पर्यावरणदूषणं तत्प्रतीकारोपायाश्च ।

(b) दण्डस्य हि भयात्सर्वं जगद् भोगाय कल्प्यते ।

(c) जनशिक्षायाः प्रयोगोपायाः ।

6. प्राचीनकालीन-वर्णाश्रमव्यवस्थितेः समकालिकं पर्यालोचनं संपादनीयम् । *60*

7. भारतीयं प्राचीनं वास्तुशास्त्रमधिकृत्य विचारविमर्शः क्रियताम् । *60*

8. अधस्तात्प्राप्तं ग्रन्थांशं सम्यगवधार्य सरलसुरगिरा प्रश्नानां समाधानं कर्तव्यम् ।

Read the following passage carefully and answer the questions that follow in Sanskrit. *10×6=60*

द्रोणेन चक्रव्यूहे निर्मिते युधिष्ठिरश्चिन्तया व्याकुलो जातः । अर्जुनेन विना नापरः कोऽपि जानाति चक्रव्यूहभेदकर्म । स च व्यापृतः संशप्तक-नामक-संग्रामे । तर्हि का गतिः ? इत्थं चिन्ताकुले युधिष्ठिरे अभिमन्युर्युधिष्ठिरमुपगम्य चिन्ताकारणं जानाति स्म । ज्ञात्वा चाह — ज्येष्ठतात ! अहं चक्रव्यूहं भेत्स्यामि । अहं गर्भस्थ एव चक्रव्यूहस्य भेदोपायं पितुः

Optional Province · optionalprovince.com

सकाशादशिक्षे । वाचमिमं श्रुत्वा नृपतिर्युधिष्ठिरः स्वस्थोऽभवत् । किन्तु तस्य चित्तमभिमन्योरमङ्गलाशङ्कया अन्तरा अन्तरा कम्पितुमारेभे । तथापि न कापुरुषत्वं परन्तु वीरत्वमेव क्षात्रधर्म इति मत्वा तदाशङ्कातः प्रतिनिवृत्तः । अथ तत्रभवान् अभिमन्युं चक्रव्यूहसंग्रामे सेनापतिपदे स्थापितवान् ।

(a) कस्य युद्धस्य विषये अयं कथांशः ? कुत्रेदं युद्धं संघटितम् ?

(b) कीदृशो बलविन्यासोऽत्र वर्णितः ? केन स निर्मितः । किं वा तस्य फलमत्रोक्तम् ?

(c) अर्जुनः कतमः पाण्डवः ? स कुत्र व्यापृतः ? तस्य किं विशेषज्ञानमासीत् ?

(d) कोऽभिमन्युः ? स कस्मिन् विषये स्वकीयं ज्ञानं कस्मै निवेदितवान् ? कथं स इदं प्राप्तवान् ?

(e) कति पाण्डवपक्षीया अस्मिन् ग्रन्थांशे उल्लिखिताः ? कोऽत्र ज्येष्ठः ? किं तस्य चिन्ताकारणम् ?

(f) क्षात्रधर्म-पदं व्याख्याय, तद्विषये अत्र यदुक्तं तदुल्लेख्यम् ।

Optional Province · optionalprovince.com